अथ कारकप्रकरणम्

(वैयाकरणसिद्धान्तकौमुद्याः)

१. **प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा॥ २/३/४६**

नियतोपस्थितिकः प्रातिपदिकार्थः। मात्रशब्दस्य प्रत्येकं योगः। प्रातिपदिकार्थमात्रे, लिङ्गमात्राद्याधिक्ये, परिमाणमात्रे संख्यामात्रे च प्रथमा स्यात्। प्रातिपदिकार्थमात्रे – उच्चैः। नीचैः। कृष्णः। श्रीः। ज्ञानम्। लिङ्गमात्रे – तटः, तटी, तटम्। परिमाणमात्रे – द्रोणो व्रीहिः। वचनं संख्या। एकः। द्वौ। बहवः।

पदच्छेदः – प्रातिपदिकार्थ – लिङ्ग–परिमाण–वचनमात्रे प्रथमा।

सूत्रविश्लेषणम् –

यस्मिन् प्रातिपदिके उच्चारिते यस्यार्थस्य नियमेनोपस्थितिः स प्रातिपदिकार्थः। अवधारणार्थकस्य मात्रशब्दस्य प्रत्येकं योगः। प्रातिपदिकार्थमात्रे, लिङ्गमात्राधि क्ये परिमाणमात्रे संख्यामात्रे च प्रथमाविभक्तिः स्यात्।

प्रातिपदिकार्थमात्रस्योदाहरणानि –

अलिङ्गाः शब्दाः – उच्चैः, नीचैः।

नियतलिङ्गाः शब्दाः – कृष्णः, श्रीः, ज्ञानम्।

लिङ्गमात्राधिक्यस्योदाहरणानि –

अनियतलिङ्गाः शब्दाः – तटः, तटी, तटम्।

परिमाणमात्रस्योदाहरणम् – द्रोणो व्रीहिः

वचनमात्रस्योदाहरणम् – एकः। द्वौ। बहवः।

उदाहरणविश्लेषणम्

उच्चैस् + सु = सुलोपे, सस्य रुत्वे विसर्गे – उच्चैः। अव्ययम्।

नीचैस् + सु = सुलोपे, सस्य रुत्वे विसर्गे – नीचैः। अव्ययम्।

कृष्ण + सु = सस्य रुत्वे विसर्गे – कृष्णः। वासुदेवः।

श्री + सु = सस्य रुत्वे विसर्गे – श्रीः। लक्ष्मीः।

ज्ञान + सु = सोरमि पूर्वरूपे – ज्ञानम् । धीः।

तट + सु = सस्य रुत्वे विसर्गे – तटः। पुँल्लिङ्गम्।

तटी + सु = सुलोपे। तटी। स्त्रीलिङ्गम्।

तट + सु = सोरमि पूर्वरूपे। तटम्। नपुंसकलिङ्गम्।

द्रोणो व्रीहिः– द्रोण + सु, व्रीहि + सु = सस्य रुत्वे विसर्गे
द्रोणः + व्रीहिः – द्रोणो व्रीहिः। परिमाणविशेषः।

एक + सु = एकः। पुंसि। एकसंख्याकः।

द्वि + औ = द्वौ। पुंसि। द्विसंख्याकौ।

बहु + जस् = बहवः। पुंसि। बहुसंख्याकाः।

रूपलेखनप्रकारः –

उच्चैः – उच्चैस् शब्दात् ''प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा'' इति सूत्रेण प्रथमायां सुविभक्तौ अव्ययत्वात् ''अव्ययादाप्सुपः'' इति सुलोपे सस्य रुत्वे विसर्गे च कृते उच्चैः इति रूपं सिद्धम्। एवं नीचैः इत्यादयः शब्दाः।

२. **सम्बोधने ॥२।३।४७॥**

प्रथमा स्यात्। हे राम।।

३. **कर्तुरीप्सिततमं कर्म ॥१।४।४१।**

कर्तुः क्रियया आप्तुम् इष्टतमं कारकं कर्मसंज्ञं स्यात्

४. **कर्मणि द्वितीया ॥२।३।२॥**

अनुक्ते कर्मणि द्वितीया स्यात्। हरिं भजति। अभिहिते तु कर्मादौ प्रथमा - हरिः सेव्यते। लक्ष्म्या सेवितः।

अन्योदाहरणानि -

प्रातः, सायम्, रामः, सरस्वती, पुण्यमित्यादीनि।

२. सम्बोधने चेति -

पदच्छेदः - सम्बोधने, च।

सूत्रविश्लेषणम् -

प्रातिपदिकात् सम्बोधनरूपे अधिके अर्थे प्रथमाविभक्तिः एव स्यात्

उदाहरणविश्लेषणम् -

हे राम + सु = सुलोपे - हे राम। हे दाशरथिन्।

रूपलेखनप्रकारः -

हे राम - राम शब्दात् ''सम्बोधने च'' इति सूत्रेण सम्बोधनार्थे प्रथमाविभक्तौ सौ ''एकवचनं सम्बुद्धिः'' इति सम्बुद्धिसंज्ञायाम् - सम्बुद्धिसंज्ञकसुलोपे हे राम इति सिद्धम्।

अन्योदाहरणानि -

हे देवदत्त!

हे लते!

हे कुलम्!

हे साधो!, हे हरे!

हे मातः!, हे देवि!

हे अम्ब! इत्यादीनि।

३. **कर्तुरीप्सिततममिति-**

पदच्छेदः - कर्तुः ईप्सिततमं कर्म इति।

सूत्रविश्लेषणम् -

कर्ता क्रियाद्वारा यद् आप्तुम् अतिशयेन इच्छति, तत् कारकं सत् कर्मसंज्ञं भवति। क्रियाजनकत्वं कारकत्वम्। क्रियान्वयित्वं वा कारकत्वम्। यथा - हरिं भजति। अत्र कर्ता भक्तः पूजादि-क्रियया हरिमाप्तुमिच्छति, अतः हरिः कर्मसंज्ञोऽस्ति।

४. **कर्मणि द्वितीयेति -**

पदच्छेदः - कर्मणि, द्वितीया।

सूत्रविश्लेषणम् -

तिङ् - कृत् - तद्धित - समासैश्च अनभिहिते = अनुक्ते कर्मणि द्वितीया - विभक्तिः स्यात्।

१. अनुक्ते कर्मणि द्वितीया यथा - हरिं भजति। अत्र तिङ्प्रत्ययः (लकारः) कर्तरि जातः। अतः तिङा कर्ता उक्तः, कर्म अनुक्तम् अस्ति। तस्माद् अनुक्ते कर्मणि हरिशब्दे द्वितीया-विभक्तिः।

(२) उक्ते कर्मणि तु प्रथमैव भवति - यथा

५. **अकथितं च ।।१।४।५१।।**

अपादानादि-विशैषैरविवक्षितं कारकं कर्मसंज्ञं स्यात्।

दुह्याच्पच्दण्ड्रुधिप्रच्छिचिब्रूशासुजिमथ्मुषाम्।

कर्मयुक्स्यादकथितं तथा स्यान्नीहृकृष्वहाम्।

गां दोग्धि पयः। बलिं याचते वसुधाम्। तण्डुलान् ओदनं पचति। गर्गान् शतं दण्डयति। व्रजम् अवरुणद्धि गाम्। माणवकं पन्थानं पृच्छति। वृक्षम् अवचिनोति फलानि। माणवकं धर्मं ब्रूते शास्ति वा। शतं जयति देवदत्तम्। सुधां क्षीरनिधिं मथ्नाति। देवदत्तं शतं मुष्णाति। ग्रामम् अजां नयति हरति कर्षति वहति वा।

---

(१) हरिः सेव्यते। इह लकारः कर्मणि जातः। अतः कर्म उक्तम्। तस्माद् हरिशब्दे प्रथमा। (२) लक्ष्म्या सेवितः। अत्रापि क्त-प्रत्ययः कर्मणि एव। कर्म उक्तम्। तस्मात् सेवितः (हरिः) इत्यत्र प्रथमा।

उदाहरणविश्लेषणम् -

हरिं भजति - कर्मणि द्वितीया, हरिं भजति। विष्णुं सेवते।

रूपलेखनप्रकारः

(१) हरिं भजति अत्र ''कर्तुरीप्सिततमं कर्म'' इति सूत्रेण हरिशब्दस्य कर्मसंज्ञायां 'कर्मणि द्वितीया'' इति द्वितीया-विभक्तौ हरिं भजतीति वाक्यं साधु।

अन्योदाहरणानि -

अनुक्ते कर्मणि - देवदत्तः ओदनं पचति। पुस्तकं पठति। अश्वं बध्नाति ग्रामं गच्छति इत्यादीनि।

५. **अकथितञ्चेति -**

पदच्छेदः - अकथितम्, च।

सूत्रविश्लेषणम् -

अकथितम् इत्यस्य अविवक्षितम् इत्यर्थः। यत् कारकं अपादानत्वादियोग्यं सदपि, तेन रूपेण अविवक्षितं भवेत्, तत् कर्मसंज्ञं भवति। एतादृशं कर्म प्रधानं न भवति, अतः गौणम् अप्रधानं वा तत्। यदि तस्य कारकस्य विषये अपादानादिरूपेण वक्तुः विवक्षा भवेत् तदा तु तस्य कर्मसंज्ञा न भवति, किन्तु अपादानादिसंज्ञैव। एतादृशाः धातवः द्विकर्मकाः उच्यन्ते। दुह् - याच् - पचादयो षोडश धातवः द्विकर्मका धातवः परिगणिताः सन्ति। गां दोग्धि पयः इत्यादिषूदाहरणेषु कर्मद्वयं विद्यते। तत्र एकं प्रधानं कर्म अन्यच्च अकथितं कर्म अस्ति। अकथितस्य एव कर्मसंज्ञा अनेन सूत्रेण कर्त्तव्या।

उदाहरणविश्लेषणम् -

(१) गां दोग्धि पयः - इह गौः अपादानम्। तस्य अपादानरूपेण अविवक्षायाम् ''अकथितं च'' इति सूत्रेण कर्मसंज्ञायां द्वितीया भवति।

(२) बलिं याचते वसुधाम् - अत्र बलेः अपादानत्वस्य अविवक्षायां तस्य कर्मसंज्ञा द्वितीया च।

(३) अविनीतं विनयं याचते - अत्र अविनीतम् इति गौण-कर्म, अतः द्वितीया।

(४) तण्डुलान् ओदनं पचति - वाक्येऽस्मिन् तण्डुलान् इति गौणकर्म। अतः पूर्ववत् कर्मसंज्ञायां द्वितीया।

(५) गर्गान् शतं दण्डयति - अत्र गर्गान् इति गौणकर्म। कर्मत्वाद् द्वितीया विभक्तिः।

अर्थनिबन्धनेयं संज्ञा।

बलिं भिक्षते वसुधाम्। माणवकं धर्मं भाषते, वक्तीत्यादि।

६. **अधिशीङ्स्थासां कर्म ॥१।४।४६॥**

अधिपूर्वाणाम् एषाम् आधार: कर्म स्यात्।

अधिशेते अधितिष्ठति अध्यास्ते वा वैकुण्ठं हरि:।

---

(६) व्रजम् अवरुणद्धि गाम् – व्रजे अधिकरणत्वस्य अविवक्षायां गौण – कर्मत्वात् द्वितीया।
(७) माणवकं पन्थानं पृच्छति – माणवके करणत्वस्य अविवक्षायां कर्मत्वाद् द्वितीया।
(८) वृक्षम् अवचिनोति फलानि – वृक्षे अपादानत्वस्य अविवक्षायां कर्मत्वाद् द्वितीया।
(९) माणवकं धर्मं ब्रूते शास्ति वा – माणवकाय धर्मं बोधयति इत्यर्थ:।
(१०) शतं जयति देवदत्तम् – इह देवदत्ते अपादानत्वस्याविवक्षायाम्, अकथितं कर्म, द्वितीया च।
(११) सुधां क्षीरनिधिं मथ्नाति – क्षीरनिधे: सकाशात् सुधां प्राप्नोति इत्यर्थकेऽस्मिन् वाक्ये क्षीरनिधौ अपादानत्वस्याविवक्षायां कर्मसंज्ञा द्वितीया च।
(१२) देवदत्तं शतं मुष्णाति – देवदत्ते अपादानत्वस्याविवक्षायां कर्मत्वाद् द्वितीया।
(१३) ग्रामम् अजां नयति हरति कर्षति वहति वा – ग्रामे अजां प्रापयति इत्यर्थके वाक्ये ग्रामे अधिकरणत्वस्याविवक्षायां कर्मसंज्ञा द्वितीया च।

अर्थनिबन्धनेयमिति –

'अकथितञ्च' इति सूत्रेण दुह्याचादिकारिकापठितानां द्विकर्मकधातूनां मुख्यकर्मणा यस्य योगो भवति, तस्य या कर्मसंज्ञा विधीयते, सा अर्थमूलिकाऽस्ति। अत: याच्धातुसमानार्थकस्य भिक्ष्धातो: मुख्यकर्मणा योगेऽपि ''अकथितञ्च' इति सूत्रेण अपादानत्वादिरूपेण अविवक्षितस्य कर्मसंज्ञा द्वितीया च कार्या।

उदाहरणविश्लेषणम् –

(१) बलिं भिक्षते वसुधाम् – अत्रापि बले: अपादानत्वस्याविवक्षायाम् 'अकथितञ्चे' ति सूत्रेण कर्मसंज्ञा द्वितीया च।

(२) माणवकं धर्मं भाषते, वक्तीत्यादि – इहापि माणवके सम्प्रदानत्वस्य अविवक्षायां, कर्मसंज्ञा द्वितीया च।

रूपलेखनप्रकार: –

(१) बलिं भिक्षते वसुधाम् – अत्र याच्धातुसमानार्थकस्य भिक्ष्धातो: कर्मणा योगे बले: अपादानत्वस्याविवक्षायाम् ''अकथितञ्च'' इति सूत्रेण कर्मसंज्ञायां ''कर्मणि द्वितीया'' इति द्वितीयायां बलिं भिक्षते वसुधामिति सिद्धम्

(६) पदच्छेद: – अधि – शीङ् – स्थाआसाम् कर्म।

सूत्रविश्लेषणम् –

अधि+शीङ् धातो., अधि+स्था धातो:, अधि + आस् धातो: प्रयोगे आधारकारकस्य कर्मसंज्ञा भवति।

उपसर्गा:	+ धातव:		रूपाणि	आधारस्य कर्मसंज्ञा	कर्त्ता
अधि	+ शीङ्	=	अधिशेते	वैकुण्ठं	हरि:
अधि	+ स्था	=	अधितिष्ठति	वैकुण्ठं	हरि:
अधि	+ आस्	=	अध्यास्ते	वैकुण्ठं	हरि:

रूपलेखनप्रकार: –

१. अधिशेते अधितिष्ठति अध्यास्ते वा वैकुण्ठं हरि: – अत्र 'अधि-शीङ् स्थासां कर्म' इति सूत्रेण आधारस्य वैकुण्ठस्य कर्मसंज्ञायां 'कर्मणि द्वितीया' इति द्वितीया विभक्तौ 'अधिशेते वैकुण्ठं हरि:', अधि

७. **उपान्वध्याङ्वसः ॥१।४।४१॥**

उपादिपूर्वस्य वसतेराधारः कर्म स्यात्। उपवसति, अनुवसति, अधिवसति, आवसति वा वैकुण्ठं हरिः।

(वा.) अभुक्त्यर्थस्य न। वने उपवसति।

८. **लक्षणेत्थम्भूताख्यानभागवीप्सासु प्रतिपर्यनवः॥ १/४/९०**

तिष्ठति वैकुण्ठं हरिः, अध्यास्ते वैकुण्ठं हरिः इति वाक्यत्रयं सिद्धम्।

अन्यान्युदाहरणानि –

१. याचको भूमिमधिशेते।
२. कृषकः क्षेत्रम् अधितिष्ठति।
३. बालकः गृहम् अध्यास्ते।
४. गुरुः कक्षाम् अधितिष्ठति।
५. वयं भारतम् अधितिष्ठामः।
६. भगवान् शिवः श्मशानम् अधिशेते।
७. अधिष्ठाता छात्रावासम् अधितिष्ठति।
८. पिता पूजामन्दिरम् अध्यास्ते।
९. सर्पःबिलमधिशेते।
१०. राजा राजप्रासादम् अधिशेते। इत्यादीनि।

७. पदच्छेदः – उप + अनु + अधि + आङ् वसः।

सूत्र-विश्लेषणम् –

उपपूर्वस्य, अनुपूर्वस्य, अधिपूर्वस्य, आङ्पूर्वस्य च वस् धातोराधारः कारकं कर्मसंज्ञं स्यात्।

उदाहरणविश्लेषणम् –

उपसर्गाः		धातुः		रूपाणि	आधारस्य कर्मसंज्ञा	अर्थः
उप	+	वस्	=	उपवसति	वैकुण्ठं हरिः	हरिः वैकुण्ठे वसति
अनु	+	वस्	=	अनुवसति	वैकुण्ठं हरिः	हरिः वैकुण्ठे वसति
अधि	+	वस्	=	अधिवसति	वैकुण्ठं हरिः	हरिः वैकुण्ठे वसति
आङ्	+	वस्	=	आवसति	वैकुण्ठं हरिः	हरिः वैकुण्ठे वसति

रूपलेखनप्रकारः –

१. उपवसति, अनुवसति, अधिवसति, आवसति वां वैकुण्ठं हरिः। हरिः वैकुण्ठे वसति इत्यर्थे ''उपान्वध्याङ्वसः'' इति सूत्रेण उप+वस्-धातोः प्रयोगे आधारस्य वैकुण्ठस्य कर्मसंज्ञायां ''कर्मणि द्वितीया'' इति द्वितीया – विभक्तौ (१) उपवसति वैकुण्ठं हरिः इति वाक्यं सिद्धम्। एवमेव (२) अनुवसति वैकुण्ठं हरिः, (३) अधिवसति वैकुण्ठं हरिः, (४) आवसति वैकुण्ठं हरिः इति रूपाणि सिद्धानि।

अन्योदाहरणानि –

उपवसति, अनुवसति, अधिवसति आवसति वा सिंहोऽरण्यम्। हरिः वनम् उपवसति।

भोजननिवृत्त्यर्थे तु **'वने उपवसति'** इति वाक्यम्। वने उपवासं करोति इत्यर्थः। भोजननिवृत्त्यर्थे (उपवासार्थे) तु उपपूर्वकवस्धातोः आधारस्य कर्मसंज्ञा न भवति इति वार्तिकाशयः।

८. **पदच्छेदः**–लक्षणेत्थम्भूताख्यानभागवीप्सासु प्रति+परि + अनवः।

सूत्रविश्लेषणम्

– ज्ञापकार्थविषयभूते, इत्थम्भूताख्यानार्थविषये, भागार्थविषयभूते, वीप्सार्थविषयभूते च प्रति परि अनु इत्येते कर्मप्रवचनीयसंज्ञकाः भवन्ति। एष्वर्थेषु विषयभूतेषु प्रत्यादयः उक्तसंज्ञाः स्युः। लक्षणे – वृक्षं प्रति परि अनु वा विद्योतते विद्युत्। इत्थम्भूताख्याने – भक्तो विष्णुं प्रति परि अनु वा। भागे – लक्ष्मीर्हरिं प्रति परि अनु वा। वीप्सायाम् – वृक्षं वृक्षं प्रति परि अनु वा सिञ्चति। अत्रोपसर्गत्वाभावान्न षत्वम्। एषु किं ? परिषिञ्चति।

ततः ''कर्मप्रवचनीययुक्ते द्वितीया'' इति सूत्रेण यस्य कर्मप्रवचनीयेन योगः, तत्र द्वितीयाविभक्तिः भवति।

उदाहरणविश्लेषणम् –

१. लक्षणे –

वृक्षं प्रति परि अनु वा विद्योतते विद्युत् अत्र वृक्षेण लक्ष्यमाणा विद्युत् विद्योतते इत्यर्थः। लक्षणेऽर्थे लक्षणेत्थमिति सूत्रेण प्रत्यादीनां कर्मप्रवचनीयसंज्ञायां तद्योगे वृक्षशब्दाद् द्वितीया।

२. इत्थम्भूताख्याने –

भक्तो विष्णुं प्रति परि अनु वा विष्णुविषयकभक्तिमान् इत्यर्थः। पूर्ववत् इत्थम्भूताख्यानेऽर्थे प्रत्यादीनां कर्मप्रवचनीयसंज्ञायाम्, द्वितीयाविभक्तिः।

३. भागे –

लक्ष्मीर्हरिं प्रति परि अनु वा। हरेर्भाग इत्यर्थः। प्रत्यादेः प्रत्येकं शब्दस्य कर्मप्रवचनीयसंज्ञात्वाद् तद्योगे 'हरिम्' इति द्वितीयाविभक्तिः।

४. वीप्सायाम् –

वृक्षं वृक्षं प्रति परि अनु वा सिञ्चति। प्रत्येकं वृक्षं सिञ्चतीत्यर्थः। अत्रापि वीप्सायां प्रत्यादीनां कर्मप्रवचनीयत्वाद् तद्योगे 'वृक्षम्' इति द्वितीयाविभक्तिः।

रूपलेखनप्रकारः –

१. वृक्षं प्रति परि अनु वा विद्योतते विद्युत् – अत्र वृक्षेण लक्ष्यमाणा विद्युत् विद्योतते इत्यर्थके वाक्ये ''लक्षणेत्थम्भूताख्यानभागवीप्सासु प्रतिपर्यनवः'' इति सूत्रेण प्रत्यादीनां कर्मप्रवचनीयसंज्ञायां ''कर्मप्रवचनीययुक्ते द्वितीया'' इति सूत्रेण द्वितीयाविभक्तौ वृक्षं प्रति परि अनु वा विद्योतते विद्युत् इति सिद्धम्। एवम् अन्यत्र अपि।

विशेषः –

यत्र कर्मप्रवचनीयसंज्ञा भवति, तत्र प्रत्यादीनाम् उपसर्गसंज्ञा न भवति। अतः उपसर्गात् परतः विद्यमानस्य सिञ्चत्यादेः सस्य विधीयमानं षत्वम् उक्तवाक्येषु 'अनुसिञ्चति' इत्यत्र न भवति। यत्र तु एषां कर्मप्रवचनीयसंज्ञा न भवति तत्र एषाम् उपसर्गत्वात् षत्वं भवत्येव, यथा – 'परिषिञ्चति' इत्यादि।

९. **कालाध्वनोरत्यन्तसंयोगे ॥२।३।५॥**

इह द्वितीया स्यात्। मासं कल्याणी। मासमधीते। मासं गुडधानाः। क्रोशं कुटिला नदी। क्रोशमधीते। क्रोशं गिरिः। अत्यन्तसंयोगे किम् ? मासस्य द्विरधीते। क्रोशस्यैकदेशे पर्वतः।

१०. **साधकतमं करणम् ।१।४।४२।**

क्रियासिद्धौ प्रकृष्टोपकारकं कारकं करणसंज्ञं स्यात्। तमब्ग्रहणं किम् ? गङ्गायां घोषः।

११. **कर्तृकरणयोस्तृतीया॥२।३।३१९॥**

अनुक्ते कर्तरि करणे च तृतीया स्यात्। रामेण बाणेन हतो बाली।

---

९. **कालाध्वनोरिति** - पदच्छेदः - कालाध्वनोः, अत्यन्तसंयोगे।

सूत्रविश्लेषणम् -

गुणक्रियाद्रव्यैः सह कालाऽध्वनोः अत्यन्तसंयोगे सति कालाऽध्ववाचक शब्दाभ्यां द्वितीयाविभक्तिः स्यात्।

उदाहरणविश्लेषणम् -

		कालस्यात्यन्तसंयोगः	**अध्वनोऽत्यन्तसंयोगः**
गुणेन सह	=	मासं कल्याणी	क्रोशं कुटिला नदी
क्रियया सह	=	मासमधीते	क्रोशमधीते
द्रव्येण सह	=	मासं गुडधानाः	क्रोशं गिरिः।

रूपलेखनप्रकारः -

मासं कल्याणी - अत्र कालवाचकमासशब्दस्य 'कल्याणी' इत्यनेन गुणेन सह अत्यन्तसंयोगे सति 'कालाध्वनोरत्यन्तसंयोगे' इति सूत्रेण कालवाचकात् मासशब्दाद् द्वितीयायां मासं कल्याणी इति वाक्यं सिद्धम्। एवं सर्वत्र।

अन्योदाहरणानि -

मासार्धं कल्याणी। मासद्वयमधीते। मासद्वयं गुडधानाः। क्रोशद्वयं सरला सरित्। क्रोशार्धमधीते। क्रोशद्वयं पर्वतः।

१०. **पदच्छेदः** - साधकतमम् करणम्।

सूत्रविश्लेषणम् -

काचिदपि क्रिया फलं निष्पादयितुं क्रियते। फले एव क्रियायाः सिद्धिः भवति। तत्र क्रियासिद्धौ यत्कारकं प्रकृष्टतया उपकरोति तत् कारकं करणसज्ञं भवति।

उदाहरणस्य प्राथमिकस्थितेर्विश्लेषणम् -

रामेण बाणेन हतो बाली - अत्र हननक्रियायां प्रकृष्टोपकारकस्य बाणस्य करणसंज्ञा, तस्मात् तृतीयाविभक्तिः (बाणसंयोगेन एव प्राणवियोगरूपफलस्य निष्पन्नत्वात् बाणस्य क्रियासिद्धौ प्रकृष्टोपकारकता)।

११. पदच्छेदः - कर्तृ - करणयोः तृतीया।

सूत्रविश्लेषणम् - अनुक्ते कर्तरि, अनुक्ते करणे च तृतीया स्यात्

उदाहरणविश्लेषणम् -

'रामेण बाणेन हतो बाली' इति वाक्ये रामः कर्ता, बाणः करणम्। कर्मवाच्ये अस्मिन् वाक्ये कर्मणः उक्तत्वात् कर्ता करणञ्च उभे अनुक्ते स्तः, अतः तत्र अनेन सूत्रेण तृतीया, रामेण, बाणेन इति।

१२. **सहयुक्तेऽप्रधाने ॥२।३।११॥**

सहार्थेन युक्तेऽप्रधाने तृतीया स्यात्। पुत्रेण सहागतः पिता।

१३. **येनाङ्गविकारः ॥२।३।२०॥**

येनाङ्गेन विकृतेनाङ्गिनो विकारो लक्ष्यते, ततः तृतीया स्यात्। अक्ष्णा काणः। अक्षिसम्बन्धिकाणत्वविशिष्ट इत्यर्थः। अङ्गविकारः किम् ? अक्षिकाणमस्य।

रूपलेखनप्रकारः -

१. रामेण बाणेन हतो बाली -

अत्र ''स्वतन्त्रः कर्ता'' इति सूत्रेण रामशब्दस्य कर्तृसंज्ञायां ''साधकतमं करणम्'' इति सूत्रेण बाणशब्दस्य करणसंज्ञायां कर्मणि प्रत्ययविधानाद् अनुक्ते कर्तरि करणे च ''कर्तृकरणयोस्तृतीया'' इति सूत्रेण तृतीयायां रामेण बाणेन हतो बाली इति सिद्धम्।

अन्योदाहरणानि अभ्यासार्थम् -

१. भूपेन खड्गेन हतः खलोऽसौ।

२. देवेन नेत्रेण नष्टः कामः।

३. रामेण द्विचक्रिकया ग्रामः गतः।

१२. **पदच्छेदः - सहयुक्ते, अप्रधाने।**

सूत्रविश्लेषणम् - सहार्थेन योगे अप्रधाने तृतीया भवति।

उदाहरणविश्लेषणम् -

पुत्रेण सह आगतः पिता - अत्र आगमनक्रियायां पिता प्रधानः। पुत्रश्च अप्रधानः। अतः अप्रधाने पुत्रे तृतीया विभक्तिः। (यस्य क्रियायां साक्षात् शाब्दः सम्बन्धः सः प्रधानः, यस्य न तादृशः सम्बन्धः सः अप्रधानः)।

रूपलेखनप्रकारः-

१. पुत्रेण सह आगतः पिता - अत्र ''सहयुक्तेऽप्रधाने'' इति सूत्रेण अप्रधाने पुत्रशब्दे तृतीयाविभक्तौ पुत्रेण सह आगतः पिता इति वाक्यं साधु।

अन्योदाहरणानि -

आयाति शिष्येण सह प्रवक्ता। राजा प्रजाभिः सह भाषते च ।। बालकः मात्रा सह भुङ्क्ते।

१३. **पदच्छेदः - येन + अङ्गविकारः।**

सूत्रविश्लेषणम् -

येन विकृतेन अङ्गेन अङ्गिनः = अवयविनः विकारो दृश्यते, तस्माद् विकृताङ्गवाचिनः शब्दात् तृतीया भवति।

उदाहरणविश्लेषणम् -

अक्ष्णा काणः - अत्र अक्षि (अङ्गम्) विकृतमस्ति, तेनाङ्गिनो विकारो लक्ष्यते। अतः अक्षिशब्दात् प्रकृतसूत्रेण तृतीया भवति।

रूपलेखनप्रकारः -

(१) अक्ष्णा काणः अत्र - ''येनाङ्गविकारः'' इति सूत्रेण विकृताङ्गवाचकात् अक्षिशब्दात् तृतीयाविभक्तौ अक्ष्णा काणः।

अन्योदाहरणानि - कर्णाभ्यां बधिरः। पादेन खञ्जः। शिरसा खल्वाटः।

१४. **इत्थम्भूतलक्षणे ॥२।३।२१॥**

कञ्चित्प्रकारं प्राप्तस्य लक्षणे तृतीया स्यात्। जटाभिस्तापसः।
जटा-ज्ञाप्य-तापसत्व-विशिष्टः इत्यर्थः।

१५. **हेतौ - ॥२।३।२३॥**

हेत्वर्थे तृतीया स्यात्। द्रव्यादिसाधारणं निर्व्यापारसाधारणञ्च हेतुत्वम्। करणत्वं तु क्रियामात्रविषयं व्यापारनियतं च। दण्डेन घटः। पुण्येन दृष्टो हरिः।

१६. **कर्मणा यमभिप्रैति स सम्प्रदानम् ॥१।४।३२॥**

दानस्य कर्मणा यमभिप्रैति स सम्प्रदानसंज्ञः स्यात्।

---

१४. **इत्थम्भूतलक्षण इति।**

सूत्रविश्लेषणम् -

येन लक्षणेन चिह्नेन वा कस्यापि विशेषप्रकारकत्वं ज्ञाप्यते। (येन लक्षणेन 'अयम् एतादृशः' इति सूच्यते।) तत्र लक्षणवाचके शब्दे तृतीया भवति।

उदाहरणविश्लेषणम् -

जटाभिस्तापसः - अत्र जटाः तापसत्वं सूचयन्ति। अतः तापसत्वज्ञापकाद् जटाशब्दाद् ''इत्थम्भूतलक्षणे'' इति सूत्रेण तृतीया भवति।

रूपलेखनप्रकारः

१. जटाभिस्तापसः अत्र ''इत्थम्भूतलक्षणे'' इति सूत्रेण लक्षणवाचकात् जटा शब्दात् तृतीयाविभक्तौ 'जटाभिस्तापसः' इति वाक्यं साधु।

अन्योदाहरणानि -

रक्तकूर्चैः यवनाः। पुस्तकैश्छात्रः। स्वर्णाभूषणै आढ्यः।

१५. **हेताविति -**

सूत्रविश्लेषणम् -

अत्र हेतुशब्दः कारणपर्यायः। कारणपर्यायात् हेतुवाचकात् शब्दात् तृतीयाविभक्तिः स्यात्। हेतुः द्रव्यगुणक्रियासाधकः निर्व्यापारः सव्यापारः वा भवति। करणं तु क्रियामात्रस्य साधकं कारकं सव्यापारं भवतीति हेतुकरणयोर्भेदः।

उदाहरणविश्लेषणम् -

द्रव्यं प्रति हेतोरुदाहरणम् - दण्डेन घटः। घटस्य हेतुर्दण्डः। अतः हेतौ तृतीया। क्रियां प्रति हेतोरुदाहरणम् - पुण्येन दृष्टः। दर्शनक्रियाया हेतुः पुण्यम्। अतः हेतौ तृतीया। गुणं प्रति हेतोरुदाहरणम् - अध्ययनेन वसति। अत्र अध्ययनं वासक्रियायाः कारणम्। अतः तत्र (कारणे) हेतौ तृतीया 'अध्ययनेन' इति।

रूपलेखनप्रकारः -

१. **दण्डेन घटः** अत्र घटस्य हेतु दण्डः, तस्माद् ''हेतौ'' इति सूत्रेण दण्डशब्दे तृतीयाविभक्तौ दण्डेन घटः इति सिद्धम्। एवं सर्वत्र।

अन्योदाहरणानि - पुण्येन जीवितः। पुण्येन तेजस्वी।अत्र फलस्य अपि हेतुशब्देन ग्रहणम् - अतः 'अध्ययनेन वसति', 'दक्षिणया भुङ्क्ते' इत्याद्यपि साधु।

१६. **पदच्छेदः** - कर्मणा यम् अभिप्रैति सः सम्प्रदानम्। कर्ता दानक्रियायाः कर्मणा यं उद्देश्यं करोति सः सम्प्रदानसंज्ञकः भवति। देयद्रव्यस्योद्देश्यं सम्प्रदानं भवतीति। यथा - विप्राय गां ददाति। अत्र दाता गोकर्मणा विप्रम् अभिप्रैति। अतः विप्रस्य सम्प्रदानत्वम्।

१७. **चतुर्थी सम्प्रदाने ॥२।३।१३॥**

विप्राय गां दादाति। अनभिहित इत्येव किम् ? दीयते अस्मै दानीयो विप्रः।

१८. **नमः स्वस्तिस्वाहास्वधाऽलंवषड्योगाच्च॥२।३।१६॥**

एभिर्योगे चतुर्थी स्यात्। हरये नमः। उपपदविभक्तेः कारकविभक्तिर्बलीयसी।

(परिभाषा)।

---

१७. **पदच्छेदः - चतुर्थी, सम्प्रदाने।**

सूत्रविश्लेषणम् - अनुक्ते - सम्प्रदाने - चतुर्थीविभक्तिर्भवति।

उदाहरणविश्लेषणम् - विप्राय गां दादाति - विप्रम् उद्दिश्य गां ददातीत्यर्थः। अत्र दाता दानस्य

(वा.) तादर्थ्ये चतुर्थी वाच्या। मुक्तये हरिं भजति। कर्मणा गवा विप्रम् उद्देश्यत्वेन पश्यति, अतः अस्य विप्रस्य सम्प्रदानसंज्ञा भवति, तत्र च चतुर्थीविधानात् 'विप्राय गां ददाति' इति वाक्यं साधु भवति।

रूपलेखनप्रकारः -

१. विप्राय गां ददाति - अत्र "कर्मणा यमभिप्रैति स सम्प्रदानम्" इत्यनेन विप्रस्य सम्प्रदानसंज्ञायां "चतुर्थी सम्प्रदाने" इति चतुर्थीविभक्तौ विप्राय गां ददातीति सिद्धम्।

अन्यान्युदाहरणानि -

१. याचकाय धनं ददाति।

२. भक्ताय सुखं ददाति।

३. बालकाय कथां कथयति इत्यपि साधु।

(कथारूपकर्मणा बालकम् अभिप्रैति वक्ता)।

विशेषः - अनुक्ते सम्प्रदाने एव चतुर्थी भवति। उक्ते तु सम्प्रदाने प्रथमैव। यथा 'दीयतेऽस्मै दानीयो विप्रः' इति वाक्ये दाधातोः सम्प्रदानार्थे अनीयर्प्रत्ययविधानात् सम्प्रदानमुक्तम्। अतः तत्र 'दानीयः विप्रः' इत्येवं प्रथमैव।

तादर्थ्ये चतुर्थीति - पदच्छेदः - तादर्थ्ये, चतुर्थी, वाच्या।

उदाहरणविश्लेषणम् -

मुक्तये हरिं भजति = अत्र भजनं मुक्त्यर्थम्। मुक्त्यै भजनमुपकारकम् मुक्तिसाधकं वा।

रूपलेखनप्रकारः -

१. मुक्तये हरिं भजति - अत्र तादर्थ्य मुक्तिः। अतः "तादर्थ्ये चतुर्थी वाच्या" इति वार्तिकेन मुक्तिशब्दात् चतुर्थीविभक्तौ मुक्तये हरिं भजतीति वाक्यं साधु।

अन्यान्युदाहरणानि -

यूपाय दारु। कुण्डलाय हिरणयम्!। ओदनाय तण्डुलाः। वस्त्रेभ्यः कार्पासम्।

१८. **नमःस्वस्तीति - पदच्छेदः - नमः - स्वस्ति - स्वाहा - स्वधा- अलं - वषड्योगात् च।** नमस्करोति देवान्। प्रजाभ्यः स्वस्ति। अग्नये स्वाहा। दैत्येभ्यो हरिरलं प्रभुः समर्थः शक्तः इत्यादि। वषडिन्द्राय।

सूत्रविश्लेषणम् -

नमः, स्वस्ति, स्वाहा, स्वधा, अलं, वषड् एभिः योगे चतुर्थीविभक्तिः भवति।

उदाहरणविश्लेषणम् -

१. हरये नमः - 'नमः' इति शब्दस्य योगे हरिशब्दाच्चतुर्थी।

२. नमस्करोति - देवान् - अत्र नमः इत्यस्य योगे देवाच्चतुर्थी प्राप्ता। तां प्रबाध्य नमस्करोति इति क्रियायोगे कारकविभक्तेर्बलवत्वात् देवशब्दात् द्वितीया।

१९. **ध्रुवमपायेऽपादानम् ॥१।४।२४॥**

अपायो विश्लेषः। तस्मिन् साध्ये ध्रुवमवधिभूतं कारकम् अपादानं स्यात्।

२०. **अपादाने पञ्चमी ॥२।३।२१॥**

ग्रामादायाति। धावतोऽश्वात् पतति। कारकं किम् ? वृक्षस्य पर्णं पतति।

---

३. अग्नये स्वाहा – अग्न्युद्देश्यकं द्रव्यदानम्। अत्र स्वाहा इत्यस्य योगे अग्निशब्दाच्चतुर्थी।
४. पितृभ्यः स्वधा – पित्रुद्देश्यकं द्रव्यदानम्। अत्रापि स्वधा इत्यस्य योगे पितृशब्दात् चतुर्थी।
५. दैत्येभ्यो हरिरलं प्रभुः – अलं=समर्थः, प्रभुः वा। अलमित्यस्य योगे दैत्यशब्दात् चतुर्थी।
६ वषडिन्द्राय – अत्र वषड् इत्यस्य योगे इन्द्राच्चतुर्थी।

रूपलेखनप्रकारः-

१. हरये नमः अत्र नमः इत्यस्य योगे ''नमः स्वस्तिस्वाहास्वधा ऽलंवषड्योगाच्च'' इति सूत्रेण हरिशब्दाच्चतुर्थीविभक्तौ 'हरये नमः' इति सिद्धम्। एवं सर्वत्र।

अन्यान्युदाहरणानि –

गणेशाय नमः। शिष्याय स्वस्ति। सूर्याय स्वाहा। प्रपितामहाय स्वधा। खलेभ्यो भूपतिः अलम्। अलं मल्लः मल्लाय इत्यादीनि।

विशेषः पदविशेषयोगेन जायमाना विभक्तिः उपपदविभक्तिः भवति। यथा नमः योगे चतुर्थी। क्रियापदमाधारीकृत्य जायमाना कारकविभक्तिः। यथा – 'नमस्करोति देवान्' इति द्वितीया। अनयोः कारकविभक्तिः बलीयसी भवति।

१९. **पदच्छेदः- ध्रुवम्, अपाये, अपादानम्।**

सूत्रविश्लेषणम् –

अपाये = विभागे यद् ध्रुवम् – अवधिभूतं कारकं, तद् अपादानसज्ञं भवति। यस्मात् पृथक् भवति तत् इति भावः।

२०. अपादाने पञ्चमीति।

सूत्रविश्लेषणम् –

यस्य अपादानसंज्ञा, तत्र पञ्चमी भवति।

उदाहरणविश्लेषणम् –

१. ग्रामादायाति – अत्र ग्रामः अवधिभूतः – अस्ति। आगन्तुः ग्रामात् विभागः, अतः ग्रामः, विभागाश्रयः। तस्माच्च ग्रामशब्दात् अपादानसंज्ञकत्वात् पञ्चमी।
२. धावतोऽश्वात् पतति – अत्र यद्यपि अश्वः चलः तथापि पतनक्रियां प्रति तस्य अश्वस्य ध्रुवत्वम् = अवधित्वम् एव, अश्वारोहिणः तस्मात् अश्वात् एव विभागात्। अतः अश्वशब्दात् पञ्चमी।

रूपलेखनप्रकारः –

१. **ग्रामादायाति** – अत्र ग्रामः अवधिभूतः अस्ति। अपाये = विभागेः ''ध्रुवमपायेऽपादानमि'' ति सूत्रेण अवधिभूतस्य ग्रामस्य अपादानसंज्ञायाम् ''अपादाने पञ्चमी'' इति पञ्चमीविभक्तौ ग्रामादायातीति वाक्यं। सिद्धम् एवम् अन्यत्रापि।

अन्योदाहरणानि –

विद्यालयाद् आयाति। यानात् पतति। वृक्षात् पर्णं पतति।

विशेषः –

'वृक्षस्य पर्णं पतति' इत्यत्र तु वृक्षस्य सम्बन्धत्वेन कारकत्वाभावात् सति विभागाश्रयत्वेऽपि न अपादानसंज्ञा।

२१.　**जनिकर्तुः प्रकृति ॥१।४।३०॥**

जायमानस्य हेतुरपादानं स्यात्। ब्रह्मणः प्रजाः प्रजायन्ते।

२२.　**षष्ठी शेषे ॥२।३।५०॥**

कारकप्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावादिसम्बन्धः शेषः। तत्र षष्ठी स्यात्। राज्ञः पुरुषः। कर्मादीनामपि सम्बन्धमात्रविवक्षायां षष्ठ्येव। सतां गतम्। सर्पिषो जानीते। मातुः स्मरति। एधोदकस्योपस्कुरुते। भजे शम्भोश्चरणयोः। फलानां तृप्तः।

२१.　**जनिकर्तुरिति - पदच्छेदः - जनिकर्तुः प्रकृतिः।**

सूत्रविश्लेषणम् -

जनिः जन्म, उत्पत्तिः वा। तस्य उत्पत्तेः कर्ता जनिकर्ता, तस्य जनिकर्तुः या प्रकृतिः = यस्मात् (प्रकृतिभूतात्) जनिकर्ता जन्म लभते, तस्याः = प्रकृतेः जन्मस्थानस्य वा अपादानसंज्ञा भवति इति फलितार्थः।

उदाहरणविश्लेषणम् -

ब्रह्मणः प्रजाः प्रजायन्ते = हिरण्यगर्भात् प्रजाः उत्पद्यन्ते। अत्र उत्पत्तेः आश्रयः जायमानाः प्रजाः सन्ति, तासां हेतुभूतं ब्रह्म अपादानसंज्ञम्। अतः ब्रह्मशब्दात् पञ्चमी।

रूपलेखनप्रकारः -

१. ब्रह्मणः प्रजाः प्रजायन्ते - अत्र 'जनिकर्तुः प्रकृतिः' इति सूत्रेण ब्रह्म इत्यस्य अपादानसंज्ञायाम् ''अपादाने पञ्चमी'' इति पञ्चमीविभक्तौ ''ब्रह्मणः प्रजाः प्रजायन्ते'' इति सिद्धम्।

अन्योदाहरणानि -

पितुः पुत्रः प्रजायते। गोमयात् वृश्चिकाः जायन्ते। कामात् क्रोधः, इत्यादीनि।

२२.　**षष्ठी इति - पदच्छेदः - षष्ठी, शेषे।**

सूत्रविश्लेषणम् -

अस्मिन् प्रकरणे कर्मकरणसम्प्रदानापादानाधिकरणेषु द्वितीया - तृतीया - चतुर्थी - पञ्चमी - सप्तमी - विभक्तयः उक्ताः। प्रातिपदिकार्थादिषु प्रथमा विभक्तिरपि उक्ता। एभ्यः कर्तृकर्मादिभ्यः अतिरिक्तः कश्चन स्वस्वामिभावादिसम्बन्धः'शेषः' कथ्यते। तत्र षष्ठी भवति।

उदाहरणविश्लेषणम्

१. 'राज्ञः पुरुषः' इह स्वस्वामिभावरूपसम्बन्धत्वात् षष्ठी।
२. सतां गतम् - इह कर्तृत्वाविवक्षायां शेषषष्ठी।
३. सर्पिषो जानीते - इह करणत्वाविवक्षायां शेषषष्ठी।
४. मातुः स्मरति-मातरं स्मरति इत्यर्थः। कर्मत्वाविवक्षायां मातृशब्दात् शेषे षष्ठी।
५. एधोदकस्योपस्कुरुते-एधोदकं परिष्कुरुते इत्यर्थः। अत्र कर्मत्वाविवक्षायां षष्ठी।
६. भजे शम्भोश्चरणयोः - शम्भोश्चरणौ भजे इत्यर्थः। अत्र कर्मत्वाविवक्षायां शेषषष्ठी।
७. फलानां तृप्तः - फलैः तृप्तः इत्यर्थः। अत्र करणत्वविवक्षायां सम्बन्ध मात्र - विवक्षायां फलशब्दात् षष्ठी।

रूपलेखनप्रकारः -

राजः पुरुषः - अत्र स्वस्वामिभावरूपसम्बन्धे ''षष्ठी शेषे'' इति सूत्रेण राजन्शब्दात् षष्ठीविभक्तौ राज्ञः पुरुषः इति रूपम्

उदाहरणानि अभ्यासार्थम् -

दशरथस्य पुत्रः। मम गृहम्। सज्जनां वचनम्। गुरोः आश्रमः इत्यादीनि।

२३. **कर्तृकर्मणोः कृति ॥२।३।६५॥**

कृद्योगे कर्तरि कर्मणि च षष्ठी स्यात्।

२४. **आधारोऽधिकरणम् ।१।४।४५।**

कर्तृकर्मद्वारा तन्निष्ठक्रियाया आधारः कारकम् अधिकरणसंज्ञः स्यात्।

२५. **सप्तम्यधिकरणे च ॥२।३।३६॥**

अधिकरणे सप्तमी स्यात्। चकाराद् दूरान्तिकार्थेभ्यः। औपश्लेषिको, वैषयिकोऽभिव्यापकश्चेत्याार-स्त्रिधा। कटे आस्ते। स्थाल्यां पचति। मोक्षे इच्छास्ति। सर्वस्मिन्नात्माऽस्ति। वनस्य दूरे अन्तिके वा। ''दूरान्तिकार्थेभ्यः'' इति विभक्तित्रयेण सह चतस्रोऽत्र विभक्तयः फलिताः।

---

२३. **पदच्छेदः कर्तृ - कर्मणोः कृति।**

सूत्रविश्लेषणम् -

कृत्प्रत्यययोगे (कृदन्तशब्देन सह योगे) अनुक्ते कर्तरि कर्मणि च षष्ठी स्यात्। कृत्प्रत्ययः यस्मिन् अर्थे कृतः, सः अर्थः उक्तः, अन्यार्थः अनुक्तः। यदि कृत्प्रत्ययेन कर्ता उक्तः, तत्र सकर्मकधातोः कर्म अनुक्तं भवति, तत्र अनुक्ते कर्मणि षष्ठी। यत्र कृत्प्रत्ययेन कर्म उक्तम्, तत्र कर्ता अनुक्तः, अतः कर्तृवाचकात् शब्दात् षष्ठी इति ज्ञेयम्। यत्र कृत्प्रत्ययेन भावः उक्तः तत्र कर्तृकर्मणी उभे अपि अनुक्ते भवतः।

उदाहरणविश्लेषणम् -

१. 'कृष्णस्य कृतिः' इति वाक्ये कृतिरिति कृत्प्रत्ययान्तः, तद्योगे अनुक्त कर्तृवाचके कृष्णशब्दे षष्ठी।

२. 'जगतः कर्ता कृष्णः' अत्र कर्ता इति कृत्प्रत्ययान्तः। तद्योगे अनुक्त कर्मवाचके जगच्छब्दे षष्ठी।

रूपलेखनप्रकारः

१. ''कृष्णस्य कृतिः'' अत्र कृतिरिति कृत्प्रत्ययान्तः। तस्य योगे ''कर्तृ-कर्मणोः कृति ''इति सूत्रेण कर्तृवाचके कृष्णशब्दे षष्ठीविभक्तौ कृष्णस्य कृतिरिति रूपम्। एवमन्यत्र।

अन्योदाहरणानि -

छात्रस्य कृतिः। सृष्टेः विधाता ब्रह्मा। तव गमनम्। मम पाठः। गवां दोहः। गीतायाः वाचनम्।

२४. **पदच्छेदः - आधारः, अधिकरणम्।**

सूत्रविश्लेषणम् -

आद्ध्रियते अस्मिन् इत्याधारः। कर्तुराधारः कर्मणश्च आधारः क्रियाधारः भवति। अतः कर्तृकर्मद्वारा कर्तृकर्मनिष्ठक्रियायाः आधारः कारकम् अधि करणसंज्ञं भवति। क्रियाद्विधा - फलात्मिका व्यापारात्मिका च। फलात्मिकायाः आधारः कर्म, व्यापारात्मिकायाश्च आधारः कर्ता। अतः क्रियायाः साक्षात् आधारस्तु कर्तृसंज्ञः कर्मसंज्ञश्च भवति। किन्तु कर्तृकर्मणोः आधारः अत्र परम्परया क्रियायाः अपि आधारः भवति। अत उक्तं ''कर्तृकर्मद्वारा.'' इति।

२५. **सप्तम्यधिकरणे चेति - पदच्छेदः - सप्तमी, अधिकरणे च।**

सूत्रविश्लेषणम् -

अनुक्ते अधिकरणकारके सप्तमीविभक्तिर्भवति। चकाराद् दूरार्थेभ्यः समीपार्थकेभ्यश्च शब्देभ्यः अपि सप्तमी भवति। आधारस्त्रिविधो भवति

१. औपश्लेषिकः २. वैषयिकः ३. अभिव्यापकश्च। तत्र -

१. औपश्लेषिकः संयोगादिसम्बन्धः। कटे आस्ते। स्थाल्यां पचति।

२. वैषायिकः - विषयतासम्बन्धः। मोक्षे इच्छा अस्ति।

३. अभिव्यापकः - आधेयेन सह व्यापकः सम्बन्धः। सर्वस्मिन् आत्मा

२६.　**षष्ठी चानादरे ॥२।३।३१।**

अनादराधिक्ये भावलक्षणे षष्ठीसप्तम्यौ स्त:। रुदति रुदतो वा प्राव्राजीत् रुदन्तं पुत्रादिकम् अनादृत्य संन्यस्तवानित्यर्थ:।

२७.　**यतश्च निर्धारणम् - ॥२।३।४१।**

जातिगुणक्रियासंज्ञाभि: समुदायादेकदेशस्य पृथक्करणं निर्धारणं, यतस्तत: षष्ठीसप्तम्यौ स्त:। नृणां नृषु वा द्विज: श्रेष्ठ:। गवां गोषु वा कृष्णा बहुक्षीरा। गच्छतां गच्छत्सु वा धावञ्छीघ्र:। छात्राणां छात्रेषु वा मैत्र: पटु:।　**इति कारकप्रकरणम्**

अस्ति। चकाराद् दूरार्थवाचकात् अन्तिकार्थवाचकादपि सप्तमी विधीयते। वनस्य दूरे समीपे वा।

उदाहरणविश्लेषणम्

१. कटे अस्ति - संयोगसम्बन्ध:। कर्तृद्वारा आसनक्रियाया: आधारस्य कटस्य अधिकरणसंज्ञायां तत्र कटे सप्तमी।

२. स्थाल्यां पचति - अत्रापि पूर्ववदेव।

३. मोक्षे इच्छास्ति - विषयतासम्बन्ध:। मोक्षे सप्तमी। मोक्षविषयकेच्छा इत्यर्थ:।

४. सर्वस्मिन् आत्मा अस्ति- आधेयेन सह व्यापक: सम्बन्ध:। सर्व-शब्दे सप्तमी।

५. वनस्य दूरे अन्तिके वा- अत्र 'दूर' शब्दात् अन्तिकशब्दाच्च सप्तमी।

रूपलेखनप्रकार: -

१. 'कटे आस्ते' अत्र कर्तु: कटस्य च संयोगसम्बन्ध:। कर्तृनिष्ठा या आसनक्रिया तस्या: अपि कट: कर्तृद्वारक: आधार एव। अत: कर्तृद्वारा क्रियाधारस्य कटस्य ''आधारोऽधिकरणम्'' इति सूत्रेण अधिकरणसंज्ञायां कृतायां ''सप्तम्यधिकरणे च'' इति सूत्रेण तत्र सप्तमीविभक्तौ ''कटे आस्ते'' इति वाक्यं साधु।

२६.　**पदच्छेद: - षष्ठी, च, अनादरे।**

सूत्रविश्लेषणम् -

अनादरे गम्यमाने सति यया क्रियया क्रियान्तरं लक्ष्यते, तस्मात् लक्षकक्रिया वाचकात् षष्ठी, सप्तमी च भवत:।

उदाहरणविश्लेषणम् -

रुदति रुदतो वा प्राव्राजीत् - कदा प्राव्राजीत् ? इति प्रश्ने उत्तरमिदम्। रुदन्तं पुत्रम् अनादृत्य संन्यासं गृहीतवान् इत्यर्थ:। अत्र पुत्रस्य रोदनक्रियया पितु: प्रव्रजनक्रिया लक्ष्यते। पुत्रेण कृतेऽपि रोदने स प्रव्रजनात् न निवृत्त:, इत्थं तेन पुत्रस्य अनादर: अपि गम्यते। अत: तत्र पुत्रस्य रोदनक्रियावाचकात् 'रुदत्' इति प्रतिपदिकात् षष्ठी सप्तमी च विभक्ति: विधीयते, रुदत:, रुदति इति। 'रुदत्' इति शतृप्रत्ययान्तम्।

रूपलेखनप्रकार: -

'रुदति रुदतो वा प्राव्राजीत्' इत्यत्र अनादरस्य गम्यमानत्वात् भावलक्षणात् 'रुदत्' इति प्रातिपदिकात् ''षष्ठी चानादरे'' इति सूत्रेण सप्तमीविभक्तौ 'रुदति' इति, षष्ठ्यां विभक्तौ तु 'रुदत:' इत्येवं रूपात् वाक्यमिदं सिद्धम्।

अन्यानि उदाहरणानि -

अनुनयत: अनुनयति वा गत:। याचमानस्य याचमाने वा गत: धनी। निवेदयत: निवेदयति वा न स्वीकृतवान् इत्यादीनि।

२७.　**पदच्छेद: यत:, च, निर्धारणम्।**

सूत्रविश्लेषणम् -

जातिगुणक्रियासंज्ञाभि: यस्मात् समुदायाद् एकदेश: पृथक्क्रियते तस्मात् समुदायवाचकशब्दात् षष्ठी सप्तमी च भवत:।

उदाहरणविश्लेषणम् –

१. नृणां नृषु वा द्विजः श्रेष्ठः – नृशब्दः मनुष्यसमुदायवाचकः, तस्माद् द्विजजातिः पृथक् क्रियते, अतः नृशब्दात् षष्ठी सप्तमी च भवतः।

२. गवां गोषु वा कृष्णा बहुक्षीरा – गोशब्दः पशुविशेषजातिसमुदायवाचकः। तस्मात् गुणाधारेण 'कृष्णा' इति (बहुक्षीरवत्त्वात्) इत्येकदेशः पृथक् क्रियते। अतः गोशब्दात् षष्ठी-सप्तम्यौ।

३. गच्छतां गच्छत्सु वा धावञ्छीघ्रः – गच्छतां समुदायात् धावत्क्रियाविशिष्टस्य पृथक्करणं भवति, अतो गच्छत् इति शब्दात् षष्ठी सप्तमी च।

४. छात्राणां छात्रेषु वा मैत्रः पटुः – छात्रसमुदायाद् एकदेशस्य मैत्रनामकछात्रस्य पृथक्करणं भवति, तस्मात् छात्रशब्दात् षष्ठीसप्तम्यौ स्तः।

रूपलेखनप्रकारः

१. **'नृणां नृषु वा द्विजः श्रेष्ठः'** अत्र मनुष्यसमुदायवाचकात्

नृशब्दात् द्विजः (जातिरूपः एकदेशः) जात्या पृथक् क्रियते अतः "यतश्च निर्धारणम्" इति सूत्रेण नृशब्दात् षष्ठीविभक्तौ सप्तमीविभक्तौ च नृणां नृषु वा द्विजः श्रेष्ठः। एवम् अन्यत्र अपि।

अन्योदाहरणानि अभ्यासार्थम्

मृगाणां मृगेषु वा गौः श्रेष्ठा।
नारीणां नारीषु वा पतिव्रता कुलीना।
धावतां धावत्सु वा गच्छन् मन्दः।
दाशरथीनां दाशरथिषु रामो ज्येष्ठः।

इति कारकप्रकरणं समाप्तम्

अभ्यासार्थं प्रश्नाः

वस्तुनिष्ठ प्रश्नाः –

१. प्रातिपदिकार्थमात्रे विभक्तिः स्यात्।
(क) प्रथमा (ख) द्वितीया
(ग) तृतीया (घ) सप्तमी ( )

२. कर्तुः क्रियया आप्तुम् इष्टतमं कारकं स्यात्।
(क) अधिकरणसंज्ञम् (ख) करणसंज्ञम्
(ग) अपादानसंज्ञम् (घ) कर्मसंज्ञम् ( )

३. द्वितीयाविभक्तिः स्यात्
(क) उक्ते कर्मणि (ख) अनुक्ते कर्तरि
(ग) अपादाने (घ) अनुक्ते कर्मणि ( )

४. अधि-पूर्वाणां शीङ्स्थाऽसाम् आधारो भवति –
(क) कर्ता (ख) कर्म
(ग) करणम् (घ) सम्प्रदानम् ( )

५. ''कालाध्वनोरत्यन्तसंयोगे'' इत्यस्य उदाहरणमस्ति।

(क) गां दोग्धि पयः (ख) मासमधीते

(ग) हरिं भजति (घ) द्रोणो व्रीहिः ( )

६. 'रामेण बाणेन हतो बाली' इत्यत्र अनुक्तं करणमस्ति।

(क) रामेण (ख) बाणेन

(ग) हतः (घ) बाली ( )

७. सहयुक्ते तृतीया विभक्तिः स्यात् -

(क) प्रधाने (ख) अप्रधाने

(ग) प्रधानेऽप्रधाने च (घ) प्रधानाप्रधानरहिते ( )

८. दण्डेन घटः इत्यत्र तृतीया केन सूत्रेण भवति।

(क) येनाङ्गविकारः (ख) हेतौ

(ग) साधकतमं करणम् (घ) इत्थम्भूतलक्षणे ( )

९. 'हरये नमः' इत्यत्र हरिशब्दे विभक्तिरस्ति।

(क) चतुर्थी (ख) सम्बोधनम्

(ग) द्वितीया (घ) प्रथमा ( )

१०.जायमानस्य प्रकृते (हेतोः) संज्ञा भवति -

(क) अधिकरणम् (ख) अपादानम्

(ग) सम्बन्धः (घ) करणम् ( )

११. कृद्योगे कर्तरि कर्मणि च विभिक्तिर्भवति।

(क) प्रथमा (ख) द्वितीया

(ग) षष्ठी (घ) सप्तमी ( )

१२. 'यतश्च निर्धारणम्' इत्यस्योदाहरणमस्ति।

(क) क्रोशं कुटिला नदी (ख) अक्ष्णा काणः

(ग) रुदति रुदतो वा प्राव्राजीत्

(घ) नृणां नृषु वा द्विजः श्रेष्ठः ( )

लघूत्तरप्रश्नाः -

प्रश्न १ 'कर्मणि द्वितीया' इत्यस्य अर्थो लेख्यः।

प्रश्न २ 'सम्बोधने च' इत्यस्योदाहरणं लेख्यम्।

प्रश्न ३ 'रामेण बाणेन हतो बाली' इत्यत्र अनुक्ते कर्तरि तृतीया केन सूत्रेण भवति।

प्रश्न ४ 'रुदति रुदतो वा प्राव्राजीत्' इत्यत्र षष्ठी-सप्तमी-विधायकं सूत्रं लिखत।

प्रश्न ५ निम्नाङ्कितानां ससूत्रं सिद्धिर्विधेया।

१. हरिं भजति।

२. जटाभिस्तापसः।

३. धावतोऽश्वात् पतति।

४. जगतः कर्ता कृष्णः।

५. गच्छतां गच्छत्सु वा धावञ्छीघ्रः।

निवेदनम्

स्खलनं सम्भवं लेखे येन केनापि हेतुना।
आद्यां प्रवृत्तिमेतां नः समादधतु सज्जनाः।।